

1

# संसाधनानि

मोना राजूः च स्व-गृह-स्वच्छतायै मातुः साहाय्यं कुर्वन्तौ आस्ताम् । मोना अवदत् - “एतानि सर्वाणि वस्तूनि पश्यतु.... वस्त्राणि, पात्राणि, अन्नम्, कङ्कतम्, मधुकूपिकाम्, पुस्तकानि.... एतेषु प्रत्येकं वस्तु उपयोगि अस्ति” माता अकथयत् “अतः एतानि वस्तूनि उपयोगीनि / महत्त्वपूर्णानि सन्ति” । पुनः माता अवदत् “एतानि वस्तूनि संसाधनानि” । राजुः मातरम् अपृच्छत् यत् संसाधनं किम् ? माता अकथयत्, “प्रत्येकं वस्तु यस्य उपयोगः आवश्यकतानां पूर्तये कर्तुं शक्यते, तत् संसाधनम् ।”

“परितः पश्यन्तु निरीक्षणं च कुर्वन्तु, भवन्तः संसाधनानां विविधप्रकारान् अवगन्तुं सक्षमाः भविष्यन्ति । यदा पिपासा भवति तदा जलं पिबन्ति, भवन्तः स्वगृहे यस्याः विद्युतः उपयोगं कुर्वन्ति, विद्यालयतः गृहं प्राप्तुं प्रयुक्तस्य यस्य रिक्शायानस्य उपयोगं कुर्वन्ति, अध्ययनाय च यस्य पाठ्यपुस्तकस्य उपयोगं कुर्वन्ति, एतानि सर्वाणि वस्तूनि (वस्त्राणि, पात्राणि, जलम्, अन्नम्, कङ्कतम्, मधुकूपिका, पुस्तकानि, रिक्शायानम्, पाठ्यपुस्तकम्, विद्युत् इत्यादीनि) संसाधनानि ।” भवतः पिता भवतः कृते यम् अल्पाहारं निर्मितवान् तस्मिन् अल्पाहारे यानि अपर्युषित-शाकानि तेन (पितृद्वारा) प्रयुक्तानि तानि अपि संसाधनानि सन्ति ।”

जलम्, विद्युत्, रिक्शायानम्, शाकम्, पाठ्यपुस्तकं च इति एतेषु सर्वेषु वस्तुषु किं साम्यम् अस्ति । तेषु वस्तुषु सर्वेषां वस्तूनाम् उपयोगः भवद्भिः कृतः । अतः तानि वस्तूनि (जलम्, अन्नम्, विद्युत्, पाठ्यपुस्तकम् इत्यादीनि) उपयोगीनि सन्ति । कस्यचिद् वस्तुनः अथवा पदार्थस्य उपयोगिता अथवा प्रयोज्यता तद् वस्तु संसाधनत्वेन निरूपयति ।

सम्प्रति राजूः ज्ञातुम् इच्छति स्म यत्, “ किमपि वस्तु संसाधनं कथं भवति ?” माता बालकान् अवदत् यत् वस्तूनि तदा संसाधनत्वेन उच्यन्ते यदा तेषां किमपि मूल्यं भवति ।“ एतस्य प्रयोगः अथवा उपयोगिता एतस्मै वस्तुने मूल्यं प्रददाति । माता अकथयत् यत् सर्वाणि संसाधनानि मूल्यवन्ति भवन्ति ।

मूल्यम् इत्यस्य अर्थः महत्त्वं भवति । केषाञ्चित् संसाधनानाम् आर्थिकं मूल्यं भवति। एतद्विपरीतं केषाञ्चित् संसाधनानाम् आर्थिकं मूल्यं न भवति । उदाहरणार्थं धातूनां (स्वर्णम्, मौक्तिकम्, रजतम्, अयस्कम् इत्यादीनाम्) आर्थिकं मूल्यं भवति परन्तु कस्यचित् मनोरमभूदृश्यस्य आर्थिकं मूल्यं न भवति परन्तु एते द्वे (१.यस्य मूल्यं भवति २. यस्य मूल्यं न भवति) महत्त्वपूर्णे संसाधने स्तः अपि च मानवीयावश्यकताः पूरयतः ।

कानिचन संसाधानानि यथासमयम् आर्थिकरूपेण मूल्यवन्ति भवितुम् अर्हन्ति । भवतां पितामह्याः पारिवारिक-प्राथमिकोपायानां / गृहोपचाराणां किमपि वाणिज्यिकं मूल्यं न अस्ति, परन्तु यदि ते (उपचाराः) एकमात्राधिकारत्वेन (पेटेण्टरूपेण) चिकित्सकीयसमूहेन (मेडिकलफर्मद्वारा) विक्रीयन्ते, तर्हि ते आर्थिकरूपेण मूल्यवन्तः भवन्ति ।

**आगच्छन्तु किञ्चित् प्रयोगद्वारा अवगच्छाम**

स्वगृहे स्वकक्षायां च प्रयोगयोग्याणां केषाञ्चित् पञ्चसंसाधनानां आवलिं कुर्वन्तु ।

**शब्दावली**

**“पेटेण्ट”**

कस्यचिद् विचारस्य अथवा आविष्कारस्य उपरि एकमात्राधिकारः “पेटेण्ट” इति कथ्यते ।

समयः प्रौद्योगिकी च एतौ महत्त्वपूर्ण-कारकौ स्तः, यौ पदार्थान् संसाधने परिवर्तितुं शक्नुतः । एतौ (समयः प्रौद्योगिकी च) जनानाम् आवश्यकताभिः सह सम्बन्धितौ स्तः। मानवाः स्वयमेव अतीव-महत्त्वपूर्णानि संसाधनानि सन्ति । मानवानां विचाराः, ज्ञानम्, आविष्काराः च अधिकाधिक-संसाधनानां रचनां कुर्वन्ति । प्रत्येकम् आविष्कारात् बहवः अन्ये आविष्काराः जायन्ते । अग्नेः आविष्कारात् भोजन-पाचनस्य पद्धतिः संजाता एवमेव अन्यासां प्रक्रियाणाम् अपि प्रचलनम् अभवत्, एतद्विपरीतं चक्रस्य आविष्कारात् अन्ततः परिवहनस्य नवीनतम-विधीनां विकासः संजातः । जलविद्युन्निर्माण-प्रौद्योगिक्या तीव्रवेगेण वहता जलेन ऊर्जाम् उत्पाद्य, जलम् एकं महत्त्वपूर्णं संसाधनं निर्मितम् ।




## संसाधनानां प्रकाराः

सामान्यतः संसाधनानां वर्गीकरणं त्रिप्रकारकं भवति –

१. प्राकृतिकं संसाधनम्, २. मानवनिर्मितं संसाधनम् ३.स्वयमेव मानवः

### प्राकृतिकं संसाधानम्

यानि संसाधनानि प्रकृतितः प्राप्यन्ते अपि च अधिकसंशोधनं विना उपयोगयोग्यानि भवन्ति तानि प्राकृतिकसंसाधानानि कथ्यन्ते।वायुः, येन वयं श्वासं प्रश्वासं च कुर्मः सः वायुः , अस्माकं नदीनां तडागानां जलम्, मृत्तिका, खनिजं च इति एतानि सर्वाणि प्राकृतिकसंसाधनानि सन्ति । एतेषु संसाधनेषु बहूनि प्रकृतेः निःशुल्कोपहाराः पुनश्च प्रत्यक्षतः प्रयोगयोग्यानि भवन्ति । कासुचित् परिस्थितिषु प्राकृतिकसंसाधनानाम् उत्तमप्रकारेण उपयोगार्थं यन्त्राणां प्रौद्योगिक्याः च आवश्यकता भवितुम् अर्हति ।

विभिन्नेषु समूहेषु प्राकृतिकसंसाधनानां वर्गीकरणं तदीयविकासानुगुणं, प्रयोगस्तरानुगुणम्, उद्गमानुगुणम्, भण्डारानुगुणम्, वितरणानुगुणं च क्रियते । विकासस्य उपयोगस्य च आधारे संसाधनानां द्विविधं वर्गीकरणं कृतम् – वास्तविकसंसाधनम्, सम्भाव्यसंसाधनम् ।

वास्तविकसंसाधनानि तानि संसाधनानि भवन्ति येषां मात्रा ज्ञायते । तेषां संसाधनानाम् अधुना उपयोगः क्रियते, जर्मनीदेशस्य रूरप्रदेशे कृष्णाङ्गारस्य, पश्चिम-एशियाक्षेत्रे खनिजतैलस्य, महाराष्ट्रे दक्कनपठारस्य कृष्णमृदः पर्याप्ताः निक्षेपाः च इति एतानि सर्वाणि वास्तविक-संसाधनानि सन्ति ।

सम्भाव्यसंसाधनानि तानि भवन्ति येषां सम्पूर्णमात्रा न ज्ञातुं शक्यते पुनश्च अधुना एतेषां संसाधनानां प्रयोगः अपि न क्रियमाणः अस्ति । एतेषां संसाधनानां प्रयोगः भविष्ये कर्तुं शक्यते । अस्मिन् काले अस्माकं प्रौद्योगिक्याः यः स्तरः अस्ति सः स्तरः सम्भवतः एतेषां संसाधनानां सारल्येन पर्याप्तरूपेण च उपयोगार्थम् उन्नतः न अस्ति । लद्दाखे प्राप्तं यूरेनियम् इति तत्त्वं (element) सम्भाव्यसंसाधनस्य एकम् उदाहरणम् अस्ति यस्य उपयोगः भविष्ये कर्तुं शक्यते । द्विशद्वर्षेभ्यः पूर्वं तीव्रगत्यात्मकपवनः किञ्चन संभाव्यं संसाधनम् आसीत् परन्तु अद्य सः वास्तविकसंसाधनम् अस्ति यथा- नीडरलैण्डदेशस्य पवनफार्म्



**शब्दावली**

**“प्रौद्योगिकी”**

किमपि कौशलं कर्तुम् अथवा वस्तु निर्मातुं नवीनतमज्ञानस्य अनुप्रयोगः प्रौद्योगिकी कथ्यते ।



**क्रियाविधिः**

मातुः सूचीतः तेषां संसाधनानाम् उपरि गोलाकारं कुर्वन्तु येषाम् अधुनापर्यन्तं वाणिज्यिक-मूल्यं नास्ति ।



**मातुः सूची**

- कार्पासिक-वस्त्राणि
- लौहायस्कः
- बुद्धिः
- औषधीयपादपाः
- औषधज्ञानम्
- कृष्णाङ्गार-निक्षेपाः
- मनोरम-दृश्यानि
- कृषि-भूमिः
- शुद्ध-पर्यावरणम्
- लोक-गीतानि
- सुरम्य ऋतुः
- संसाधन-परिपूर्णता
- एकः सुन्दरः संगीत-ध्वनिः
- पितामह्याः गृहोपचाराः
- मित्रैः परिवारेण च सह स्नेहः



इत्यत्र पवनपेषणयन्त्रस्य (पवनचक्कीयन्त्रस्य) प्रयोगेण ऊर्जा उत्पाद्यते । एवंविधपवनालयाः (पवनफार्म्स्) तमिलनाडोः नगरकोइल् इति नगरे गुजरातस्य च तटे द्रष्टुं शक्यन्ते ।



चित्रम् 1.1 पवन-पेषणी

उत्पत्तिम् आधारीकत्य संसाधनानां जैव-अजैवरूपेण विभाजनं कर्तुं शक्यते । सजीववस्तूनि जैवसंसाधनानि एतद्विपरीतं निर्जीववस्तूनि अजैवसंसाधनानि भवन्ति यथा मृद्, शिला, खनिजं च अजैवसंसाधनानि सन्ति परन्तु वृक्षाः वनस्पतयः जन्तवः च जैवसंसाधनानि सन्ति ।

प्राकृतिकसंसाधनानि विस्तृतरूपेण नवीकरणीय-संसाधनेषु अनवीकरणीय-संसाधनेषु च विभक्तानि सन्ति ।

नवीकरणीयसंसाधनानि तानि संसाधनानि सन्ति यानि शीघ्रं नवीकृतानि अथवा पुनः पूरितानि भवन्ति । एतेषु कानिचन असीमितानि सन्ति अपि च तेषाम् उपरि मानवीयक्रियाणां प्रभावः न भवति, यथा सौरोर्जा पवनोर्जा च परन्तु तथापि जलम्, मृद्, वनं च इति एतेषां केषाञ्चित् नवीकरणीयसंसाधनानाम् अनवधानपूर्वकम् उपयोगेन भाण्डागारं प्रभावितः भवति । यद्यपि जलम् असीमितं नवीकरणीयं संसाधनं प्रतीयते तथापि जलस्य न्यूनता प्राकृतिकजलस्रोतसां च शोषणम् अद्य विश्वस्य बहुषु भागेषु एका महती समस्या अस्ति ।

अनवीकरणीयसंसाधनानि तानि संसाधनानि सन्ति येषां भाण्डागाराणि सीमितानि सन्ति । भाण्डागारं यदि समाप्तं भवति तर्हि तेषां संसाधनानां नवीकरणे अथवा पुनःपूरणे सहस्रवर्षाणि अपेक्ष्यन्ते । अयम् अवधिः मानवीयजीवनस्य अवधेः अपेक्षया अधिकतरः अस्ति । एतादृशानि संसाधनानि अनवीकरणीय-संसाधनानि भवन्ति । उदाहरणम् - कृष्णाङ्गारः, पैट्रोलियम् एवं च प्राकृतिकगैस् इति कानिचन अनवीकरणीय-संसाधनानाम् उदाहरणानि सन्ति ।

वितरणम् आधारीकृत्य संसाधनानां द्वौ भेदौ स्तः 1- सर्वव्यापकसंसाधनम् 2. स्थानिकसंसाधनम्-- यानि संसाधनानि सर्वत्र प्राप्यन्ते तानि संसाधनानि सर्वव्यापकसंसाधनानि कथ्यन्ते यथा वायुः येन वयं श्वासं प्रश्वासं च कुर्मः, सर्वव्यापकसंसाधनम् अस्ति ।

2-स्थानिकसंसाधनम्--- तानि संसाधनानि यानि केषुचित् निश्चितस्थानेषु एव प्राप्यन्ते, स्थानिकसंसाधनानि कथ्यन्ते यथा –ताम्रम् ,अयस्कम्

प्राकृतिकसंसाधनानां वितरणं भू-भागकारकं जलवायुकारकम् औनत्यकारकं च इत्यादिषु विविधेषु भौतिककारकेषु आश्रयति । भू-भागे एतेषु कारकेषु वैविध्यकारणात् संसाधनानां वितरणम् असमानम् अस्ति ।

**शब्दावली**

**संसाधन-भाण्डागारम्**

उपयोगार्थं संसाधनस्य उपलब्धमात्रा अस्ति ।

**आगच्छन्तु किञ्चित् कृत्वा शिक्षेम–**

केषाञ्चन नवीकरणीय-संसाधनानां विषये चिन्तयन्तु अथ च वदन्तु यत् केन प्रकारेण संसाधनानाम् अधिकोपयोगः तेषां भाण्डागारं प्रभावयति ।

**आगच्छन्तु किञ्चित् कृत्वा शिक्षेम–**

यानि संसाधनानि भवन्तः परितः पश्यन्ति तेषु पञ्चानां मानव-निर्मित-संसाधनानां सूचीं निर्मान्तु।

**किं भवन्तः जानन्ति ?**

**मानव-संसाधनेन** अभिप्रायः जनानां संख्यया तथा च तेषां मानसिक-शारीरिकयोग्यतया अस्ति। यद्यपि मानवस्य संसाधनत्वेन स्वीकरणे जनेषु मतवैभिन्न्यं अस्ति तथापि एतत् न अस्वीकर्तुं शक्यते यत् मूलतः मानवीय-कुशलताः एव भौतिक-पदार्थान् मूल्यमत्संसाधनत्वेन निर्मातुं साहाय्यं कुर्वन्ति।

## मानवनिर्मित-संसाधनम्

प्राकृतिकपदार्थाः तदा संसाधनत्वेन जायन्ते यदा तेषां मूलरूपं परिवर्तितं भवति। अयस्कः तावत्पर्यन्तं संसाधनत्वेन न आसीत् यावत्पर्यन्तं जनैः तस्मात् (अयस्कात्) लौहनिर्माणं न शिक्षितम्। जनाः प्राकृतिकसंसाधनानाम् उपयोगं सेतुनिर्माणाय, मार्गनिर्माणाय, यन्त्रनिर्माणाय, वाहननिर्माणाय च कुर्वन्ति यच्च मानवनिर्मितसंसाधनस्य नाम्ना ज्ञायते। प्रौद्योगिकी अपि एकं मानवनिर्मितसंसाधनम् अस्ति।

*मोना बोधयन्ती अकथयत् यत् "अतः अस्मादृशाः जनाः प्राकृतिकसंसाधनानाम् उपयोगं कृत्वा मानवनिर्मितसंसाधनानां निर्माणं कुर्वन्ति" ततः परं राजूः स्वीकारपूर्वकम् अवदत् - "आम्"!!*

## मानवसंसाधनम्

जनाः इतोऽपि अधिकसंसाधननिर्माणाय प्रकृतेः उत्तमम् उपयोगं तदैव कर्तुं शक्नुवन्ति यदा तेषां (जनानां) पार्श्वे एतस्य ज्ञानं, कौशलं, प्रौद्योगिकी च उपलब्धाः स्युः। अतः मनुष्यः इति एकं विशिष्टप्रकारकं संसाधनम् अस्ति अतः जनाः मानवसंसाधनत्वेन सन्ति। शिक्षा स्वास्थ्यं च जनान् बहुमूल्यसंसाधनरूपेण निर्मातुं साहाय्यं कुरुतः। अधिकाधिकसंसाधनानां निर्माणे सामर्थ्यं प्राप्तुं जनानां कौशले संस्करणं मानवसंसाधनविकासः इति कथ्यते।










**पठन्तु मननं च कुर्वन्तु :** मनुष्याः परस्परम् अन्योन्याश्रयाः सन्ति। कृषकाः सर्वेभ्यः अन्नानि उत्पादयन्ति। वैज्ञानिकाः कृषि-सम्बन्धितानां विभिन्न-समस्यानां समाधानानि तथा च अन्नोत्पादन-वर्धनस्य उपायान् अन्विष्यन्ति।

## संसाधनसंरक्षणम्



मोना एकं दुःस्वप्नम् अपश्यत् यत् भू-भागे सम्पूर्णं जलं शुष्कं जातम्, सर्वे वृक्षाः च छिन्नाः। तत्र नैव छाया आसीत् नैव च किमपि भोजनाय पानाय वा आसीत् । जनाः पीड्यमानाः आसन् । अपि च सर्वतः भोजनस्य छायायाः च अन्वेषणे निराशिताः भ्रमन्तः आसन् ।

सा स्वमातरम् अपि स्वप्नविषये अवदत् । सा मातरम् अपृच्छत् "मातः! किम् एतत् सत्यं भवितुम् अर्हति ।

"आम्" !! इति माता अवदत् । "यदि वयं नवीकरणीय-संसाधनानि प्रति सतर्काः न भवामः तर्हि तानि संसाधनानि दुर्लभतमानि भवितुं शक्नुवन्ति पुनश्च अनवीकरणीय-संसाधनानां निश्चयेन समाप्तिः भविष्यति ।" राजुः अपृच्छत् "वयम् एतस्य कृते किं कर्तुं शक्नुमः"? माता अवदत् "बहु किमपि, भवन्तः स्वमित्राणि किमर्थं न पृच्छन्ति ?

संसाधनानां सतर्कतापूर्वकम् उपयोगकरणं पुनश्च तेभ्यः(संसाधनेभ्यः) नवीकरणार्थं समयप्रदानं संसाधनसंरक्षणं इति कथ्यते । संसाधनानाम् उपयोगकरणस्य आवश्यकता भविष्यस्य कृते च तेषां (संसाधनानाम्) संरक्षणे सन्तुलनस्थापनं सततपोषणीयविकासः कथ्यते । संसाधनानां संरक्षणस्य अनेके उपायाः सन्ति । प्रत्येकं मनुष्यः उपभोगं न्यूनीकृत्य वस्तुनां पुनःचक्रणद्वारा पुनरुपयोगद्वारा च योगदानं दातुं शक्नोति । अन्ततः एतत् एकां विभिन्नतां रचयति यतो हि सर्वे जीवाः परस्परं सम्बद्धाः सन्ति ।

**शब्दावली**

**सततपोषणीयः विकासः**
वर्तमान-भाविवंशक्रमयोः आवश्यकता-पूर्तये संसाधनानाम् अवधानतापूर्वकम् उपयोगः सततपोषणीय-विकासः कथ्यते ।



तस्मिन् सायङ्काले बालकाः मित्राणि च पुरातनसमाचारपत्रैः व्यर्थवस्त्रैः वेणुदण्डैः च पिहितपत्राणां क्रयणस्य कृते च स्यूतानां निर्माणं कृतवन्तः। मोना अकथयत्, "वयम् एतेषु वस्तुषु कानिचन वस्तूनि तेभ्यः परिवारेभ्यः दास्यामः यान् परिवारान् वयं जानीमः"। मुस्तफा अकथयत्,"स्वसंसाधनानां संरक्षणं स्वभू-भागस्य च सजीवतायाः कृते प्रयासः एकम् उत्तमं कार्यम् अस्ति।"

जेस्सी अकथयत्, "अहं सावधानतया सतर्कतापूर्वकं च कागदानां सार्थकप्रयोगं करिष्यामि ।" सा स्पष्टरूपेण अकथयत्, "कागदनिर्माणाय बहवः वृक्षाः छिद्यन्ते ।"

"अहं अवधानपूर्वकं पश्यामि यत् मम गृहे विद्युद् व्यर्था न भवेत्" इति। मुस्तफा उच्चैः अकथयत्, "विद्युत् जलेन कृष्णाङ्गारेण च प्राप्यते ।" आशा अकथयत्,"मम गृहे जलं व्यर्थं न भवतु इति सङ्कल्पं करोमि ।

सततपोषणीयविकासस्य केचन सिद्धान्ताः

- जीवनस्य समस्तरूपाणाम् आदरः पर्यवेक्षणं च।
- मानवजीवनस्य गुणवत्तावर्धनम्।
- पृथिव्याः जीवनशक्त्याः विविधतायाः च संरक्षणम्।
- प्राकृतिकसंसाधनानां ह्रासस्य न्यूनतमीकरणम्।
- पर्यावरणं प्रति वैयक्तिके व्यवहारे अभ्यासे च परिवर्तनम्।
- समुदायानां स्वपर्यावरणस्य पर्यवेक्षणयोग्यानुरूपं निर्माणम्।

जलस्य प्रत्येकं बिन्दुः मूल्यवान् अस्ति। "बालकाः अकथयन्, "वयं सर्वे मिलित्वा परिवर्तनम् आनेतुं शक्नुमः।"

मोना राजूः तेषां मित्राणि च इदं किञ्चित् कार्यं अकुर्वन्। भवतां कः विचारः? भवन्तः संसाधनानां संरक्षणे कथं साहाय्यं करिष्यन्ति ?

अस्माकं पृथिव्याः मानवानां च भविष्यं वृक्षाणां पादपानां परितन्त्रस्य च सुरक्षया संरक्षणेन च सह सम्बद्धम् अस्ति।

सम्प्रति एतद्विषये सुनिश्चयीकरणम् अस्माकं कर्तव्यम् अस्ति यत्

- सर्वेषां नवीकरणीय-संसाधनानाम् उपयोगाः सतत-पोषणीयाः सन्ति।
- पृथिव्यां जीवनस्य विविधता संरक्षणीया।
- प्राकृतिकपर्यावरणीयतन्त्रस्य हानिः न्यूनातिन्यूना भवेत्।

## अभ्यासः

**1. निम्नलिखितप्रश्नानाम् उत्तराणि लिखत----**

(i) पृथिव्यां संसाधनानाम् असमानरूपेण वितरणं किमर्थम् अस्ति ?

(ii) संसाधनसंरक्षणं किम् अस्ति ?

(iii) मानव-संसाधनानि किमर्थं महत्त्वपूर्णानि सन्ति ?

(iv) सततपोषणीयविकासः कः ?

**2. समीचीनम् उत्तरं ✓ इति चिह्नीकुर्वन्तु ---**

(i) निम्नलिखितेषु किं संसाधनस्य निर्धारणं न करोति ?

(क) उपयोगिता

(ख) मूल्यम्

(ग) मात्रा

(ii) निम्नलिखितेषु कतमं संसाधनं मानवनिर्मित-संसाधनम् अस्ति ?

(क) कर्कट-रोगस्य उपचारौषधानि

(ख) प्रपातस्य जलम्

(ग) उष्णकटिबन्धीयवनानि

(iii) कथनं पूरयत

जैवसंसाधनम् .............अस्ति।

(क) जीवजन्तुभिः व्युत्पन्नम्

(ख) मानवनिर्मितम्

(ग) निर्जीववस्तुभिः व्युत्पन्नम्

**3. निम्नलिखितेषु अन्तरं स्पष्टं कुर्वन्तु -----**

(i) संभाव्य-वास्तविकसंसाधनयोः

(ii) सर्वव्यापक-स्थानिकसंसाधनयोः

### 4. क्रियाविधिः

"रहिमन पानी राखिए बिनु पानी सब सून।
पानी गए न ऊबरे मोती, मानुस, चून ......।। "

इमाः पङ्कतयः अकबरस्य सभायाः नवरत्नेषु अन्यतमेन अब्दुर-रहीम-खानखाना इति कविना लिखिताः । कविः अत्र कीदृशं संसाधनं प्रति सङ्केतं करोति ? अस्मिन् संसाधने समाप्ते सति किं भविष्यति ? एतस्य विषये 100 शब्देषु लिखत।

### आगच्छत क्रीडाम --

1. चिन्तयन्तु यत् भवन्तः प्रागैतिहासिक-काले एकस्मिन् वातानुकूलितप्रस्थे निवसन्ति। भवन्तः भवदीयमित्राणि च तीव्रगामिपवनानाम् उपयोगं कथं करिष्यन्ति ? किं भवन्तः पवनं संसाधनत्वेन वक्तुं शक्नुवन्ति?
   अधुना कल्पनां कुर्वन्तु यत् भवन्तः 2138 तमे वर्षे तस्मिन् एव स्थाने निवसन्ति। किं भवन्तः पवनानाम् उपयोगं कर्तुं शक्नुवन्ति ? कथम् ? किं भवन्तः वक्तुं शक्नुवन्ति यत् अधुना पवनः एकं महत्त्वपूर्णसंसाधनं किमर्थम् अस्ति ?
2. एकंप्रस्तरम्,एकंपत्रम्,एकाकागदनलिका चवृक्षशाखांस्वीकुर्वन्तु। चिन्तयन्तुयत्भवन्तःएतेषांवस्तूनाम्उपयोगं संसाधनरूपेण कथं कर्तुं शक्नुवन्ति ? अधोदत्तं च उदाहरणं पश्यन्तु रचनां च कुर्वन्तु।

| भवन्तः कस्यचित् प्रस्तरस्य उपयोगं कर्तुं शक्नुवन्ति.......  | प्रयोगाः/ उपयोगिताः |
|---|---|
| स्टापू इति क्रीडितुम् | क्रीडनकम् |
| पत्रभाराय | उपकरणम् |
| उपस्करपेषणार्थम् | उपकरणम् |
| स्व-वाटिकाम् अथवा कक्षं सज्जीकर्तुम् | अलङ्करणसामग्री |
| कूपिकाम् उद्घाटयितुम् | उपकरणम् |
| गुलेलमध्ये | शस्त्रम् |
| | |
| | |

| भवन्तः कस्यचित् पत्रस्य उपयोगं कर्तुं शक्नुवन्ति.......  | प्रयोगाः/ उपयोगिताः |
|---|---|
| | |
| | |
| | |
| | |
| | |
| | |
| | |



| भवन्तः कस्याश्चित् वृक्षशाखायाः उपयोगं कर्तुं शक्नुवन्ति.......  | प्रयोगाः/ उपयोगिताः |
|---|---|
| | |
| | |
| | |
| | |
| | |
| | |
| | |

| भवन्तः कस्याश्चित् वृक्षशाखायाः उपयोगं कर्तुं शक्नुवन्ति.......  | प्रयोगाः/ उपयोगिताः |
|---|---|
| | |
| | |
| | |
| | |
| | |
| | |
| | |